# Gokarnamahalinge Vasumanonripanushthita Pradoshapujakainkarya Varnanam

# ગોકર્ણમહાલિઙ્ગે વસુમનોનૃપાનુષ્ઠિત પ્રદોષપૂજાકૈઙ્કર્યવર્ણનમ્

## Document Information

Text title : Gokarnamahalinge Vasumanonripanushthita Pradoshapujakainkarya Varnanam

File name : gokarNamahAlingevasumanonRRipAnuShThitapradoShapUjAkainkaryavarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 23| 58ba-87||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# Gokarnamahalinge Vasumanonripanushthita Pradoshapujakainkarya Varnanam

# ગોકર્ણમહાલિઙ્ગે વસુમનોનૃપાનુષ્ઠિત પ્રદોષપૂજાકૈઙ્કુર્યવર્ણનમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

પુરા વસુમના નામ રાજાસીદતિધાર્મિકઃ ॥ ૫૮॥

વિદર્ભવિષયે દેવિ સ કૈઙ્કુર્યપરો મમ ।
નાનાપ્રકારશોભાઢ્યૈર્ભૂધરાકારગોપુરૈઃ ॥ ૫૯॥

પ્રાકારરાજદ્વૃષભૈર્ધૂયમાનપતાકકૈઃ ।
નવરત્નચિતાનેકમણ્ડપૈઃ શોભિતં નૃપઃ ॥ ૬૦॥

વાહનૈશ્ચૈવ દેવેશિ રથૈશ્ચ શતચક્રકૈઃ ।
મદાગારપરો રાજા મુક્ત્યગારાધિનાયકઃ ॥ ૬૧॥

છત્રચામરજાલૈશ્ચ સ્વર્ણશય્યાદિભાજનૈઃ ।
ક્ષૌમામ્બરૈઃ સ્વર્ણક્લૃપ્તૈઃ ભૂષણૈર્મણિકલ્પિતૈઃ ॥ ૬૨॥

કારયામાસ નૃપતિર્ગોલકં રત્નનિર્મિતમ્ ।
ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ સ્નાપનીયૈરહર્નિશમ્ ॥ ૬૩॥

સલક્ષગોઘૃતાપારદીપૈર્દીપયદમ્બિકે ।
તામ્બૂલપર્વતાંશ્ચાપિ દત્તવાન્મત્કૃપાપ્તયે ॥ ૬૪॥

કર્પૂરખણ્ડૈઃ શતશો દીપયામાસ માં શિવે ।
છત્રચામરકોટીભિર્વ્યજનાદર્શકૈરપિ ॥ ૬૫॥

નાનાવાદ્યરવૈર્દેવિ પૂરયામાસ મદ્ગૃહમ્ ।
નાટ્યાઙ્ગનાસ્તદા તેન કલ્પિતાઃ સુમનોહરાઃ ॥ ૬૬॥

સહસ્રં કમ્બુકણ્ઠ્યસ્તાઃ પીનશ્રોણિપયોધરાઃ ।
શૈવાન્સમ્ભોજયામાસ શિવનૈવેદ્યરાશિભિઃ ॥ ૬૭॥

પ્રફુલ્લપુષ્પારામં ચ મત્પૂજાર્થં પ્રકલ્પયત્ ।
સોમવારપ્રદોષેષુ ચતુર્દશ્યષ્ટમીષુ ચ ॥ ૬૮॥

શિવરાત્રિષુ દેવેશિ પર્વસ્વપિ વિશેષતઃ ।
પૂજયત્યેવ ભૂપાલો નિત્યાદ્દશગુણં શિવે ॥ ૬૯॥

તત્પ્રદોષે કૃતાં પૂજાં શ્રૃણુ ત્વમગજે શુભામ્ ।
શ્રુત્વાઽપિ લભતે ગૌરિ મમ લોકં ન સંશયઃ ॥ ૭૦॥

પ્રદોષે પૂજનં કુર્વન્નિત્યમાસ્તે પ્રહૃષ્ટધીઃ ।
ગોકર્ણેશં મહાલિઙ્ગં પશ્યન્નષ્ટોરુકિલ્બિષઃ ॥ ૭૧॥

પ્રદોષપૂજારતચિત્તવૃત્તિઃ નૃપસ્તદા મત્પદપૂજનોત્સવૈઃ ।
સમભ્યષિઞ્ચદ્ગિરિજે મહેશં ગોકર્ણલિઙ્ગસ્યમપારભાગ્યૈઃ ॥ ૭૨॥

ક્ષીરાજ્યાદિઘટૈઃ સુતૈલજઘટૈઃ સક્ષૌદ્રસચ્છર્કરાભારૈઃ
    ખણ્ડદધિપ્રસર્પિતસુસર્પ્યુત્થાજ્યમણ્ડાદિભિઃ ।
રમ્ભામ્રાદિફલૈસ્તથેક્ષુજરસૈર્જમ્બીરની રૈઃ શિવૈઃ
    સન્નારિકેલોદ્ભવદ્રવત્સુક્ષૌદ્રમહોરુકોશૈઃ ॥ ૭૩॥

આસિચ્ય ગન્ધોદકરત્નપુષ્પસૌવર્ણનીરૈશ્ચ સુગન્ધપૂરૈઃ ।
પાટીરસારૈર્મૃગનાભિપૂરૈઃ કર્પૂરસારૈશ્ચ સુશોધિતૈર્જલૈઃ ॥ ૭૪॥

આલિમ્પ્ય ગન્ધૈશ્ચ તદોરુલિઙ્ગં સંવેષ્ટ્ય શુભ્રોત્તમધૌતવસ્ત્રૈઃ ।
દત્વોપવીતાન્યુપવીતિને મે અખણ્ડશાલ્યુદ્ભવતણ્ડુલાક્ષતૈઃ ॥ ૭૫॥

અનર્ઘ્યરત્નોત્તમ ભૂષણૈર્મામભૂષયદ્દેવિ તદા નૃપાગ્રણીઃ ।
બિલ્વૈશ્ચ પદ્મૈઃ કરવીરમલ્લિકાજાતીફલૈઃ ગન્ધફલીસરૈશ્ચ ॥ ૭૬॥

ઉત્ફુલ્લનીલોત્પલપુણ્ડરીકૈઃ કલ્હારજાલૈરરવિન્દપુષ્પૈઃ ।
સમર્ચયન્નામસહસ્રતો નૃપસ્તદા મુદા માં શશિશેખરં શિવમ્ ॥ ૭૭॥

બિલ્વત્વક્પરિકલ્પિતાગરુરસૈર્ધૂપસ્તદા દીયતે
    દીપૈર્ગોઘૃતપૂરિતૈરતિસિતૈર્વર્તીભિરત્યુજ્જ્વલૈઃ ।
નૈવેદ્યૈર્દધિખણ્ડસારસુભગૈઃ સત્સોપદંશાન્વિતૈઃ
    સૂપાપૂપાદિરાશિપ્રભવપરિમલામોદિસ્વાદ્વન્નજાલૈઃ ॥ ૭૮॥

શુભ્રદ્રોણસુમપ્રભાન્નજમહારાશીભિરીશં શિવે
    સૂપાપૂપમરન્દસુનદરમહાહૈયઙ્ગવીનોત્થિતૈઃ ।

આજ્યૈઃ પ્રાજ્યૈઃ સુતપ્તપ્રભવપરિમલૈઃ કાલકાલે નિવેદ્ય
    હૃષ્ટોઽભૂત્ પ્રાર્થિવેન્દ્રો જનિશતવિતતાનન્દપુણ્યૈકમૂર્તિઃ ॥ ૭૯॥

સન્નાગવલ્લીદલભારકલ્પિતૈઃ નિષ્ટપ્તહેમાદિવિશાલપાત્રૈઃ ।
તામ્બૂલૈઃ કતકૈર્લવઙ્ગમુખરૈઃ પૂગીફલૈશ્ચૂર્ણકૈઃ ॥ ૮૦॥

ઉડુગણપતિમૌલિં ધેનુકર્ણેશલિઙ્ગં તુરગગણગણકૃષ્ટૈઃ વાદ્યજાલોત્થશબ્દૈઃ ।
ગણપતિકરશુણ્ડાલગ્નકઞ્જોત્થનાદૈઃ દશશતવરદીપૈર્દીપયામાસ ભૂપઃ ॥ ૮૧॥

સુધારસારગણ્ડોત્થિતાપારદીપૈરસ્રાણ્ડૈશ્ચ બિલ્વૈસ્તદાઽઽખણ્ડલાદ્યાઃ ।
સુધાધામખણ્ડોજ્વલન્મૌલિલિઙ્ગમખણ્ડૈકબોધાય નીરાજયન્તિ ॥ ૮૨॥

હર હર શિવ શઙ્કર પ્રસીદ દુરિતોત્થિતતાપહરાસ્તદોષે ।
ઇતિ સુરવરકિન્નરોક્તિશબ્દૈઃ કરબદ્ધાઞ્જલિભિસ્તદા પ્રદોષે ॥ ૮૩॥

છત્રૈશ્ચામરકોટિભિશ્ચ ગિરિજે માં વીજયન્ત્યાદરા -
    ન્માયૂરૈર્વ્યજનૈસ્તથૈવ વિમલાદર્શૈશ્ચ નાટ્યૈરપિ ।
દેવિ પ્રસ્તવનપ્રદક્ષિણનમસ્કારૈઃ શિવં તોષય -
    દ્ભેરીશઙ્ખમૃદઙ્ગકાહલરવૈર્નાટ્યાઙ્ગનાકલ્પિતૈઃ ॥ ૮૪॥

નાટ્યૈસ્તાલમૃદઙ્ગનૂપુરઝણત્કારારવૈઃ શઙ્કરં સન્તોષ્ય
પ્રમથેશ્વરં સ મુમુદે ધન્યઃ સ ભૂપાગ્રણીઃ ॥ ૮૫॥

રાજા -
શ્રીમદ્ગોકર્ણ શમ્ભો ભવશતજનિતાપારતાપૈકભઙ્ગં
    ત્વલ્લિઙ્ગં દૃષ્ટિસઙ્ગં યદિ ભવતિ મહાભાગ્યપૂર્ણે જનેઽસ્મિન્ ।
કાલે વીતભયે પ્રદોષસમયે સર્વૈઃ સુરૈઃ સેવિતે
    ત્વત્પાદામ્બુરુહં પ્રકૃષ્ટભવજાપારવ્યથાં સંહરેત્ ॥ ૮૬॥

શિવઃ -
ઇત્થં મામમ્બિકેશં સુરવરનિકરૈઃ શાઙ્કરૈર્દેવિ પુણ્યૈઃ
    કાલે તસ્મિન્પ્રદોષે ગિરિવરતનયે સર્વસૌખ્યેઽસ્તદોષે ।
ભૂપસ્તાપૈર્વિહીનો મુદિતવસુમનાઃ સન્માનાસ્તત્પદાબ્જં
    સમ્પૂજ્યાલોક્ય પૂતો મમ ગણવરભાગ્ભાગ્યવર્યઃ કૃતો મે ॥ ૮૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ગોકર્ણમહાલિઙ્ગે વસુમનોનૃપાનુષ્ઠિત પ્રદોષપૂજાકૈઙ્કર્યવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૩। ૫૮બ-૮૭॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 23. 58ba-87..

Notes:
Shiva describes to Devi, the Pradosha Puja conducted by King Vasumana at Gokaraneshwara MahaLinga; especially on Mondays (Somavara), (Krishna) Chaturdashi and (Krishna) Ashtami tithi-s, and Shivaratri-s.
The shlokas are maintained per the source text.

Proofread by Ruma Dewan

---

*Gokarnamahalinge Vasumanonripanushthita Pradoshapujakainkarya Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*